## युप्लुवोर्दीर्घश्छन्दसि । (६८/३६४४)

यु प्लु इत्येतयोर्ल्यपि परतः छन्दसि विषये दीर्घो भवति । '[1]दान्त्यनुपूर्वं वियूय' (ऋ. १०.१३१.२) । 'यत्रा[2] यो दक्षिणा परिप्लूय' (काठ. सं. २५.३) । —छन्दसि इति किम् ? संयुत्य । आप्लुत्य ॥

## क्षियः । (६९/३३३८)

क्षियश्च दीर्घो भवति ल्यपि परतः । प्रक्षीय[3] ॥

## निष्ठायामण्यदर्थे । (६०/३०१४)

ण्यतः कृत्यस्यार्थो भावकर्मणी, [4]ताभ्यामन्यत्र या निष्ठा तस्यां[5] क्षियो दीर्घो भवति । आक्षीणः । प्रक्षीणः । [6]परिक्षीणः । अकर्मकत्वात् [7]क्षियः कर्तरि क्तः । प्रक्षीणमिदं देवदत्तस्य इति 'क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः' (३.४.७६/३०८७) इत्यधिकरणे [8]क्तः । अण्यदर्थे इति किम् ? 'अक्षितमसि [9]मा मेक्षेष्ठाः' (तै. सं. १.६.५.१) । क्षितम् इति भावे दीर्घाभावात् 'क्षियो दीर्घात्' (८.२.४६/३०१५) इति निष्ठानत्वमपि[10] न भवति ॥

## वाऽऽक्रोशदैन्ययोः । (६१/३०८१)

आक्रोशे गम्यमाने दैन्ये च क्षियो निष्ठायामण्यदर्थे वा दीर्घो भवति । [11]क्षितायुरेधि, क्षीणायुरेधि । दैन्ये – क्षितकः, क्षीणकः । क्षितोऽयं तपस्वी, क्षीणोऽयं तपस्वी ॥

## स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च । (६२/२७६७)

स्य सिच् सीयुट् तासि इत्येतेषु भावकर्मविषयेषु परत उपदेशे अजन्तानामङ्गानां हन् ग्रह् दृश् इत्येतेषां च चिण्वत् कार्यं [12]भवति वा । यदा [13]चिण्वत् तदा इडागमो [14]भवति । कस्य ? [15]स्यसिच्सीयुट्तासीनाम् एव इति वेदितव्यम् । ते हि प्रकृताः । अङ्गस्य तु लक्ष्यविरोधात् न क्रियते । कानि पुनरस्य [16]योगस्य प्रयोजनानि ?

चिण्वद्वृद्धिर्युक् च हन्तेश्च घत्वं दीर्घश्चोक्तो यो मितां वा चिणीति ।
इट् चासिद्धस्तेन मे लुप्यते णिर्नित्यश्चायं वल्निमित्तो विघाती ॥

---

1. यथा इत्यधिकम् ड. 2. या फ, आपो ह. क. 3. उपक्षीय इत्यधिकम् ह. 4. ताभ्याम् नास्ति फ. 5. परतः इत्यधिकम् ड. फ. 6. नास्ति फ. ह. 7. क्षियः नास्ति फ. 8. क्तः नास्ति फ. ह. 9. मा मेक्षिष्ठाः क. 10. अपि नास्ति फ. 11. क्षितायुर्जाल्मः क्षीणायुर्जाल्मः ह. 12. भवति नास्ति ह. 13. चिण्वद्भावः फ. ड. 14. कार्यः फ, यदा चिण्वन्न भवति तदेडागमो न भवति इत्यधिकम् ह. 15. तच्चेति इत्यधिकम् ह. 16. योगस्य नास्ति क.